শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

মাডভূষী ৱেঙ্কটরাঘৱাচার্যস্য কৃতিষু

# ॥ শ্রী মালোলপঞ্চরত্নম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী মালোলপঞ্চরত্নম্ ॥

কদা পুণ্যে হৃদ্যে খগপতিগিরৌ ভার্গৱতটে
    শ্রিযা চঞ্চূদেৱ্যা শ্রমমুষি চরন্তং নরহরিম্।
অযে ! লক্ষ্মীকান্তাংবুজনযন ! কাযাধৱনুত !
    প্রসীদেতি ক্রোশন্নিমিষমিৱ নেষ্যামি দিৱসান্॥ **1** ॥

কদা ৱা সংসুপ্তং মহতি কমনীযাদ্রিকুহরে
    সদা শ্রীভূমিভ্যাং মৃদিতপদপদ্মং নরহরিম্।
সুরাধীশৈস্সর্ৱৈঃ ৱিনুতপদপদ্ম ! ত্রিনযন !
    প্রসীদেতি ক্রোশন্নিমিষমিৱ নেষ্যামি দিৱসান্॥ **2** ॥

কদা ৱা দ্রক্ষ্যেঽহং শ্রিতজনসখং মঙ্গলগুণং
    শ্রিযঃ কান্তং শ্রীৱণ্শঠরিপুযতীশার্চিতপদম্।
হরে ! ৱিষ্ণো ! কৃষ্ণাচ্যুত ! মুরহর ! ক্রোডনৃহরে !
    প্রসীদেতি ক্রোশন্নিমিষমিৱ নেষ্যামি দিৱসান্॥ **3** ॥

কদা ৱা কান্তারে নৃহরিপদপদ্মাঙ্কিততটে
    স্মরন্ লক্ষ্মীকান্তং কমলনযনং চন্দ্রধৱলম্।
অযে ! ষষ্ঠশ্রীৱণ্শঠরিপুযতীন্দ্রপ্রিয ! হরে !
    প্রসীদেতি ক্রোশন্নিমিষমিৱ নেষ্যামি দিৱসান্॥ **4** ॥

স্তম্ভে দর্শয ৱিষ্ণুমৱ্যযমিতি প্রোক্তেন পিত্রা ক্ষণাৎ
    স্তম্ভে প্রাদুরভূৎ কযাধুতনযেনাভ্যর্চিতো যো হরিঃ।
তং লক্ষ্মীনরসিংহরূপিণমহং তার্ক্ষ্যাদ্রিতারাধিপং
    স্বাঙ্কারূঢহরিপ্রিযাভুজসমাশ্লিষ্টং মুরারিং ভজে॥ **5** ॥

মালোলপঞ্চরত্নং মাধৱমঙ্গলগুণাংবুধের্নীতম্।
জীয়াদিদং জ্ঞভুক্তং ৱেঙ্কটরাঘৱৱিপশ্চিতা নিত্যম্॥ **6**॥

॥ শ্রী মালোলপঞ্চরত্নং সমাপ্তম্॥